**अधिजिह्विका** स्त्री जिह्वेव इवार्थे कन् अधिरूढ़ा जिह्विका वा । (आल्जिभ) उपजिह्वायाम् ।

**अधिज्य** न० अध्यारूढ़ा ज्या यत्र प्रा०ब०, अधिगतं ज्यां वा अत्या०स० । आरोपितगुणके धनुषि "त्वयि चाधिज्यकार्मुके" इति शकु० ।

**अधिज्योतिष** अव्य० ज्योतिषि विभक्त्यर्थे अव्ययी० अच् समा० । सूर्य्यतारकादिज्योतींष्यधिकृत्येत्यर्थे ।

**अधित्यका** स्त्री अधि+त्यकन् । पर्वतस्योपरिभूमौ । "आरूढ़ स्थलमधित्यकेति" सि०कौ० । "स्थाणुं तपस्यन्तमधित्यकायामिति" कुमा० । "अधित्यकायामिव धातुमय्यामिति" रघुः ।

**अधिदन्त** पु० अध्यारूढ़ो दन्तम् अत्या०स० । दन्तोपरि जातदन्ते (गजदाँत) । प्रा०ब०। तद्वति त्रि०। दन्ते विभक्त्यर्थे अव्ययी० । दन्तमधिकृत्येत्यर्थे अव्य० ।

**अधिदेव** पु० अधिकृतोदेवः येन गुणातिशयात् प्रा०ब० । सर्वदेवाधिपे परमेश्वरे। देवे विभक्त्यर्थे अव्ययी०। देवमधिकृत्येत्यर्थे अव्य० । अधिदेवं भवः ठञ् । अनुशतिका० द्विपदवृद्धिः । आधिदैविकं देवेभ्यो जाते दुःखादौ त्रि० ।

**अधिदेवता** स्त्री अधिष्ठात्री देवता शा०त० । अधिष्ठात्र्यां देवतायाम् । देवतानाम् अधिष्ठातृत्वञ्च सन्निधानमात्रेण तत्तत्पदार्थानां तत्तत्कर्म्मसु नियन्तृत्वरूपम् । तच्च साक्षात् परमेश्वरस्यैव यथोक्तम् वृ०उ० अन्तर्यामिब्राह्मणे । "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो, यं पृथिवी न वेद, यस्य पृथिवी शरीरं, यः पृथिवीमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ योऽप्सु तिष्ठन्नद्भ्योऽन्तरो, यमापो न विदुर्यस्यापः शरीरं, योऽपोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । योऽग्नौ तिष्ठन्नग्नेरन्तरो यमग्निर्न वेद, यस्याग्निः शरीरं, योऽग्निमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः। योऽन्तरिक्षे तिष्ठन्नन्तरिक्षादन्तरो, यमन्तरिक्षं न वेद यस्यान्तरिक्षं शरीरं योऽन्तरिक्षमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो वायौ तिष्ठन्वायोरन्तरो, यं वायुर्न वेद, यस्य वायुः शरीरं, यो वायुमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो दिवि तिष्ठन्दिवोऽन्तरो, यं द्यौर्न वेद, यस्य द्यौः शरीरं, यो दिवमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । य आदित्ये तिष्ठन्नादित्यादन्तरो, यमादित्यो न वेद, यस्यादित्यः शरीरं, य आदित्यमन्तरो, यमयत्येष त आत्मान्तर्याम्यमृतः । यो दिक्षु तिष्ठन्दिग्भ्योऽन्तरो, यं दिशो न विदुर्यस्य दिशः शरीरं, यो दिशोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यश्चन्द्रतारके तिष्ठंश्चन्द्रतारकादन्तरो, यञ्चन्द्रतारकं न वेद, यस्य चन्द्रतारकं शरीरं, यश्चन्द्रतारकमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । य आकाशे तिष्ठन्नाकाशादन्तरो, यमाकाशो न वेद, यस्याकाशः शरीरं, य आकाशमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यस्तमसि तिष्ठंस्तमसोऽन्तरो, यं तमो न वेद, यस्य तमःशरीरं, यस्तमोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यस्तेजसि तिष्ठंस्तेजसोऽन्तरो, यं तेजो न वेद, यस्य तेजः शरीरं, यस्तेजोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृत इत्यधिदैवतम्। अथाधिभूतम् यः सर्व्वेषु भूतेषु तिष्ठन्सर्व्वेभ्यो भूतेभ्योऽन्तरो, यं सर्व्वाणि भूतानि न विदुर्यस्य सर्व्वाणि भूतानि शरीरं, यः सर्व्वाणि भूतान्यन्तरो यमयत्येष त आत्मान्तर्याम्यमृत इत्यधिभूतम् । अथाध्यात्मम् यः प्राणे तिष्ठन्प्राणादन्तरो, यं प्राणो न वेद, यस्य प्राणः शरीरं, यः प्राणमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो वाचि तिष्ठन्वाचोऽन्तरो, यं वाङ्न वेद, यस्य वाक् शरीरं, यो वाचमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यश्चक्षुषि तिष्ठंश्चक्षुषोऽन्तरो, यं चक्षुर्न वेद, यस्य चक्षुःशरीरं, यश्चक्षुरन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यः श्रोत्रे तिष्ठञ्छ्रोत्रादन्तरो, यं श्रोत्रं न वेद, यस्य श्रोत्रं शरीरं, यःश्रोत्रमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः। यो मनसि तिष्ठन्मनसोऽन्तरो, यं मनो न वेद, यस्य मनः शरीरं यो मनोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यस्त्वचि तिष्ठंस्त्वचोऽन्तरो, यं त्वङ्न वेद, यस्य त्वक् शरीरं, यस्त्वचमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो विज्ञाने तिष्ठन्विज्ञानादन्तरो, यं विज्ञानं न वेद, यस्य विज्ञानं शरीरं, यो विज्ञानमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो रेतसि तिष्ठन्रेतसोऽन्तरो, यं रेतो न वेद, यस्य रेतः शरीरं, यो रेतोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतोऽदृष्टो द्रष्टा,ऽश्रुतः श्रोता,ऽमतो मन्ता,ऽविज्ञातो विज्ञाता, नान्योऽतोऽस्ति द्रष्टा, नान्यतोऽस्ति श्रोता, नान्यतोऽस्ति मन्ता, नान्यतोऽस्ति विज्ञातैष त आत्मान्तर्याम्यमृतोऽतोऽन्यदार्त्तम्" इति । तस्यैवांशविशेषेणाविर्भूतानां दिगाद्यभिमानिदेवानामिन्द्रियाधिष्ठातृत्वं यथा "वैकारिकादहङ्काराद्देवा वैकारिका दश । दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः" इति शार० । "शक्तिसामर्थ्याद्दिव्रतपरमेश्वराडुत्पन्नत्वेनाऽहङ्कारस्य तद्‌-